# संस्कृतम्
# दशमीकक्ष्यायाः आदर्शप्रश्नपत्राणि

(१) प्राश्नपाठशालानाम् - २०० अङ्काः

पद्यभागः - १०० अङ्काः

गद्यभागः - १०० अङ्काः

(२) संयुक्तपाठ्यक्रमः - २० अङ्काः

# पद्यभागः

## सामर्थ्यानुसारेण प्राच्यपरीक्षाप्रश्नपत्रे प्रश्नसङ्ख्या - अङ्कानां भारत्वम्

| क्र.सं | सामर्थ्यम् | प्रश्नानां स्वभावः | प्रश्नप्रकाराः | अङ्काः |
|---|---|---|---|---|
| I | **भावावगमनम्**<br>**प्रतिस्पन्दनम्**<br>(30M) | **१) परिचितश्लोकम्**<br>✦ परिचितश्लोकः एकः दीयते। तस्य षट्प्रश्नाः दीयन्ते।<br>**२) अपरिचितश्लोकम्**<br>✦ एकस्य अपरिचितश्लोकस्य षट्प्रश्नाः दीयन्ते ।<br>**३) पद्यप्रतिपदार्थलेखनम्**<br>(नक्षत्र चिह्नितश्लोकान्येव दातव्यानि ।)<br>✦ अन्तर्गतैच्छिकेन द्वौ श्लोकौ दीयेते । एकस्य प्रतिपदार्थः लेखनीयः ।<br>**४) श्लोकपूरणम् भावलेखनम्**<br>(नक्षत्र चिह्नितश्लोकान्येव दातव्यानि ।)<br>✦ अन्तर्गतैच्छिकत्वेन श्लोकद्वयं दीयते । एकं श्लोकं पूरयित्वा तस्य भावः अपि लेखनीयः ।<br>५) संघटनाक्रमेण लेखनम् | 01<br>06(6x1=6)<br>01<br>06(6x1=6)<br>01<br>1x6=6<br>01(1/2)<br>1x6=6<br>1x6=6 | 06<br>06<br>06<br>06<br>06 |
| II | **भावव्यक्तीकरणम्**<br>**सर्जनात्मकता**<br>(40M) | **१) लघुप्रश्नाः**<br>✦ एतेषु एकः प्रश्नः कविपरिचयमुद्दिश्य दीयते ।<br>✦ चत्वारः प्रश्नाः । उत्तराणि ३-५ वाक्येषु स्युः ।<br>**२) निबन्धप्रश्नाः**<br>✦ विभिन्नपाठेभ्यः प्रश्नाः समाधेयाः ।<br>✦ अन्तर्गत - ऐच्छिकत्वेन चत्वारि प्रश्नाः दीयन्ते ।<br>✦ तेषु द्वौ प्रश्नौ समाधेयौ ।<br>✦ १०-१२ वाक्येषु समाधानानि लेखनीयानि ।<br>**३) सर्जनात्मकता**<br>✦ कथा/करपत्रम्/अनुवादः/गीतम्/लेखः/सम्भाषणम् इत्यदयः दीयन्ते ।<br>✦ इमे प्रश्नाः दशमीकक्ष्यायाः पाठ्यपुस्तकस्य व्यवहाररूपसम्बन्धाः भवेयुः ।<br>✦ त्रिषु प्रश्नेषु द्वौ प्रश्नसमाधेयौ लेखनीये । | 04<br>4x3=12<br>3<br>2x08=16<br>2/3<br>2x6=12 | 12<br>16<br>12 |

| क्र.सं | सामर्थ्यम् | प्रश्नानां स्वभावः | प्रश्नप्रकाराः | अङ्काः |
|---|---|---|---|---|
| **III** | **भाषांशाः**<br>**पदजलाभिवृद्धिः -**<br>**व्याकरणांशाः**<br>(30M) | १) समानार्थकपदानि (बहुलैच्छिकम्) | 3 x 1 = 3 | 3 |
| | | २) विरुद्धार्थकपदानि (बहुलैच्छिकम्) | 3 x 1 = 3 | 3 |
| | | ३) विभिक्तिपदानि<br>बहुलैच्छिकम् - २<br>वाक्यरूपम् - १ | 3 x 1 = 3 | 3 |
| | | ४) क्रियापदानि (बहुलैच्छिकम्) | 2 x 1 = 2 | 2 |
| | | ५) सन्धयः<br>✦ सन्धिपद अभिज्ञानम्-१ (बहुलैच्छिकम्)<br>✦ सन्धिनामाभिज्ञानम्-१ (बहुलैच्छिकम्)<br>✦ सन्धिंकृत्वा सन्धिनामलेखनम्-१<br>✦ विसन्धिंकृत्व सन्धिनामलेखनम्-१ | 4 x 1 = 4 | 4 |
| | | ६) समासाः<br>✸ समस्तपदाभिज्ञानम् - १ (बहुलैच्छिकम्)<br>✸ समासनामाभिज्ञानम् - १ (बहुलैच्छिकम्)<br>✸ समस्तपदं + समासनामलेखनम्-१<br>✸ विग्रहवाक्यम् + समासनामलेखनम्-१ | 4 x 1 = 4 | 4 |
| | | ७) अलङ्काराः<br>☛ अलङ्कारनामाभिज्ञानम् -१(बहुलैच्छिकम्)<br>☛ अलङ्कारनिरूपणम् -३ | 2<br>(1 x 1)<br>(1 x 3) | 4 |
| | | ८) दत्तैः पदैः स्वीयवाक्यनिर्माणम् | 3 x 1 | 3 |
| | | ९) वचनपरिवर्तनम् | 1 x 1 | 1 |
| | | १०) छन्दः - वृत्तनिरूपणम् | 1 x 3 | 3 |
| | | | | 100 |

# आदर्शप्रश्नपत्रम् (दशमीकक्ष्या)

## प्राच्यपाठशालानाम् - पद्यभागः

**समयः - ३ घण्टाः** **अङ्काः - १००**

## PART - A **70 M**

**I. भावावगमनम् - प्रतिस्पन्दनम्**

**अ. श्लोकं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।** 06M

(1) शुचि भूषयति श्रुतं वपुः
प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः
स नयापादितसिद्धिभूषणः ।।

१) वपुः किं भूषयति ?

२) शास्त्रज्ञानस्य किमाभरणम् ?

३) प्रशमस्य आभरणं किम् ?

४) विक्रमः कीदृशः भवेत् ?

५) श्लोकेऽस्मिन् नीतिः का ?

६) ''भूषा'' इति पदस्य समानार्थकपदं लिखन्तु ।

**आ. श्लोकं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।** 06M

(2) व्याघ्रः सेवति काननं सुगहनं सिंहो गुहां सेवते,
हंसः सेवति पद्मिनीं कुसुमितां गृध्रः श्मशानस्थलीम् ।
साधुस्सेवति साधुमेव सततं नीचोऽपि नीचं जनं,
या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ।।

१. व्याघ्रः किं सेवति ?

२. सिंहः कां सेवते ?

३. श्मशानस्थलीं कः सेवते ?

४. हंसः कां सेवति ?

५. कीदृशी प्रकृतिः न त्यज्यते ?

६. 'सततम्' इति पदस्य विरुद्धार्थकपदं लिखन्तु ।

**इ) श्लोकं पठित्वा श्लोकस्यास्य प्रतिपदार्थं लिखन्तु ।** 06M

(3) प्राच्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्,
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां,
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ।।

**(अथवा)**

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मयिनः ।
प्रविश्य हि घ्नन्ति शठास्तथा विधौ,
असंवृताङ्गान्निशिता इवेषवः ।।

**ई) श्लोकं पूरयित्वा भावं लिखन्तु ।** 06M

(4) दानं भोगो ..................... गतिर्भवति ।

**(अथवा)**

यौवनं धनसम्पत्तिः ...............यत्र चतुष्टयम् ।।

(5) **अधः दत्तानि वाक्यानि संघटनाक्रमेण पुनः लिखन्तु ।** 06M

१. तदा सा गृहिणी बलाकायाः पूर्ववृत्तान्तं ज्ञापयति स्म ।

२. एकदा एका बलाका कौशिके पुरीषम् अत्यजत् ।

३. गृहिण्याः विलम्बेन कौशिकः क्रुधः जातः ।

४. ततः सा बलाका तस्य तीक्ष्णदृष्टिप्रभावेन दग्धः अभवत् ।

५. कस्मिंश्चिदरण्ये कौशिको नाम तपस्वी आसीत् ।

६. तेन शोकेन सः भिक्षार्थं समीपग्रामं गतवान् ।

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

**अ. अधः दत्तानां प्रश्नानामुत्तराणि ३-५ वाक्येषु लिखन्तु ।** 4X3=12

(6) 'उपमा कालिदासस्य' इति प्रसिद्धम् । मेघसन्देशमाधारीकृत्य लिखन्तु ।

(7) 'यच्च मनसि चिन्त्यते यच्च कीर्त्यते गिरा' इत्यस्य भावः स्वीयवाक्येषु लिखन्तु ।

(8) धर्मव्याधः किं धर्ममाचरितवान् इति स्वीयवाक्येषु लिखन्तु ।

(9) 'श‍ृणोमि वाचं तव दिव्यरूपाम्' इति कहोडः स्वपुत्रं प्रति अवदत् तदा तस्य अनुमतिं स्वीयवाक्येषु लिखन्तु।

**आ. अधः दत्तानां प्रश्नानां समाधानानि निबन्धरूपेण १०-१२ वाक्येषु लिखन्तु ।** 2 x 8 = 16

(10) 'कनकं चतुर्भिः परीक्ष्यते, एवमेव पुरुषः अपि चतुर्भिः परीक्ष्यते' एतद्वचनमुद्दिश्य तुलनात्मकतया एकं निबन्धं लिखन्तु ।

**अथवा**

मेघसन्देशे प्रस्तावितानां नगराणां वैशिष्ट्यं स्वीयवाक्येषु लिखन्तु ।

(11) 'मन्दाकिनी पापनिर्बन्धिनी गगनराण्णन्दिनी' इति वचनं सर्वदा सत्ययुक्तमिति निरूपयन्तु ।

**अथवा**

रुक्मिणी-सत्यभामयोः पतिभक्तिभेदं निरूपयन्तु ।

**इ. अधः दत्तेभ्यः प्रश्नेभ्यः द्वयोः समाधानानि सर्जनात्मकतया/प्रशंसात्मकतया लिखन्तु ।** 2 x 6 = 12

(12) 'पुत्रादिच्छेत् पराजयम्' इति वचनम् अष्टावक्र-कहोडविषये अन्वयं कृत्वा स्वीयवाक्येषु लिखन्तु ।

(13) भवता पठितं प्रसिद्धं काव्यमुद्दिश्य मित्राय पत्रं लिखन्तु ।

(14) नदीनां प्राशस्त्यमुद्दिश्य निबन्धं लिखन्तु ।

## PART - B

**30 M**

## III. भाषांशाः

**अ) रेखाङ्कितपदस्य समुचितं समानार्थकपदं दत्तेभ्यः विकल्पेभ्यः चित्वा लिखन्तु ।**

१) मेघः जलेन पूर्णः सन् श्यामः भवति । ( )

a) वायुना b) वारिणा c) अग्निना d) गगनेन

२) महात्मनः विपदि धैर्यं न त्यजन्ति । ( )

a) पुण्यकाले b) ग्रीष्मकाले c) शरत्काले d) कष्टकाले

३) भारतदेशे मन्दाकिनी परमपवित्रा नदी । ( )

a) गङ्गा b) महानदी c) गोदावरी d) नर्मदा

**आ) रेखाङ्कितस्य पदस्य समुचितं विरुद्धार्थकपदं विकल्पेभ्यः चित्वा लिखन्तु ।**

४) मान्धाता इति महाधार्मिकः पुरा भारतदेशं अपालयत् । ( )

a) नवीनम् b) कदाचित् c) अधुना d) तदानींतन

५) अविवेकी पुरुषः स्वचेष्टाभिः अपकीर्तिं प्राप्नोति । ( )

a) गौरवम् b) कीर्तिं c) वैभवम् d) विनोदम्

६) मदगजः <u>मन्दं</u> चलति । ( )

a) वेगेन b) भागेन c) भङ्गेन d) तुन्देन

**इ) रेखाङ्कितपदस्य समुचितां विभक्तिं चिन्वन्तु ।**

७) <u>गुणाः</u> पूजास्थानं न तु वयः । ( )

a) तृतीया विभक्तिः b) चतुर्थी विभक्तिः c) षष्ठी विभक्तिः d) प्रथमाविभक्तिः

८) शकुन्तलायै <u>वध्वै</u> वनदेवताः आभरणानि यच्छन्ति । ( )

a) षष्ठी विभक्तिः b) सातमी विभक्तिः c) चतुर्थी विभक्तिः d) द्वितीया विभक्तिः

**ई) समुचितं क्रियापदं चित्वा लिखन्तु ।**

९) सुधीरः श्वः रामं ..................... । ( )

a) मिलन्ति b) मेलिष्यति c) मिलामि d) मिलेम

१०) उत्तमः शिष्यः सदा गुरुं .................... । ( )

a) पुच्छति b) अपृच्छत् c) पृच्छसि d) पृच्छामि

**उ) निर्देशानुसारं लिखन्तु ।**

११) गुणसन्धेः पदं चिन्वन्तु । ( )

a) साधुरेव b) सुखोपविष्टः c) एतदर्थम् d) चैव

१२) ''दिव्यौषधैः'' - अस्य पदस्य सन्धिनाम चिन्वन्तु । ( )

a) पूर्वरूपसन्धिः b) सवर्णदीर्घसन्धिः c) वृद्धिसन्धिः d) यणादेशसन्धिः

१३) विशेषणपूर्वपदकर्मधारयसमासस्य सम्बद्धं पदं चिन्वन्तु । ( )

a) नीलोत्पलम् b) दुर्भिक्षम् c) अनर्थः d) जपदानयोः

१४) ''पुरुषव्याघ्रः'' - अस्य पदस्य समासनाम लिखन्तु । ( )

a) बहुव्रीहिः b) द्विगुः c) उपमानोत्तरपदकर्मधारयः d) द्वन्द्वः

१५) ''विलयानलाभीलफालानलज्वालमालिका .........'' अस्मिन् वाक्ये कः शब्दालङ्कारः विद्यते ? ( )

a) लाटानुप्रासः b) वृत्त्यानुप्रासः c) मुक्तपदग्रस्तः d) छेकानुप्रासः

१६) वाक् + इव ............................................ (सन्धिं कृत्वा सन्धिनाम लिखन्तु ।) 1 x 1 = 1

१७) शठोऽसौ .................... + .................... (सन्धिविच्छेदं कृत्वा सन्धिनाम लिखन्तु ।) 1 x 1 = 1

१८) मातुलश्च भागिनेयश्च । (समस्तपदं समासनाम च लिखन्तु ।) 1 x 1 = 1

१९) उपग्रामम् । (विग्रहवाक्यं, समासनाम च लिखन्तु ।) 1 x 1 = 1

**ऊ) अधः दत्तानि पदानि उपयुज्य नूतनवाक्यानि लिखन्तु ।** 3 x 1 = 3

२०) प्रतिदिनम् -

२१) सन्देशः -

२२) मित्रम् -

**ऋ) निर्देशानुसारं लिखन्तु ।** 2 x 1 = 2

२३) परमभक्तः प्रह्लादः .................. (हरि) रक्षितः । (हरिशब्दस्य तृतीया - एकवचनम्)

२४) गुरुः शिष्येभ्यः नीतिकथां अकथयत् । (बहुवचने परिवर्तय)

**ॠ) अधः दत्तस्य श्लोकपादस्य अलङ्कारनिरूपणं कुर्वन्तु ।**

२५) 'मेधां बुधः सुधामिन्दुः बिभर्ति वसुधां भवान् ।' 3M

**ए) अधः दत्तस्य श्लोकपादस्य गुरुलघुनिरूपणं गणविभजनञ्च कृत्वा वृत्तनिर्देशं कुर्वन्तु ।** 3M

२६) ''पुराधिरूढः शयनं महाधनम्''

*****
***
*

# सामर्थ्यानुसृत्य प्रश्नसङ्ख्या - अङ्कानां भारत्वम्

## प्राच्यपाठशालानाम् - गद्यभागः

| क्र.सं | सामर्थ्यम् | प्रश्नानां स्वभावः | विभिन्न प्रश्नप्रकाराः | अङ्काः |
|---|---|---|---|---|
| I | **भावावगमनम् - प्रतिस्पन्दनम्** (30M) | १. परिचितानुच्छेदं दत्त्वा ६ विभिन्नप्रश्नाः देयाः । ६ अङ्काः | 01 (6x1 = 6) | 06 |
| | | २. अपरिचितानुच्छेदं दत्त्वा ६ विभिन्नप्रश्नाः देयाः । ६ अङ्काः | 01 (6x1 = 6) | 06 |
| | | ३. परिचितानुच्छेदं दत्त्वा छात्रैः ६ विभिन्नप्रश्ननिर्माणम्। ६ अङ्काः | 01 (6x1 = 6) | 06 |
| | | ४. अपरिचितसंस्कृतलघु अनुच्छेदस्य मातृभाषानुवादः। ६ अङ्काः | 01 (6x1 = 6) | 06 |
| | | ६. संघटनाक्रमेण लेखनम् । | 01 | 06 |
| II | **भावव्यक्तीकरणम् सर्जनात्मकता** (40M) | **१. लघुप्रश्नाः**<br>✷ चत्वारः लघुप्रश्नाः दातव्याः ।<br>✷ सर्वे लेखनीयाः ।<br>✷ एतेषु एकः प्रश्नः कविमुद्दिश्य भवेत् ।<br>✷ उत्तराणि ३/४ वाक्येषु भवेयुः । | 4 (4x3=12) | 12 |
| | | **२. निबन्धप्रश्नाः**<br>✷ अन्तर्गतैच्छिकत्वेन चत्वारि प्रश्नाः दीयन्ते । (Internal choice)<br>✷ तेषु द्वौ प्रश्नौ समाधेयौ ।<br>✷ १०-१२ वाक्येषु समाधानानि लेखनीयानि । | 2 (2x8=16) | 16 |
| | | **३. सर्जनात्मकता**<br>✷ सर्जनात्मकप्रश्नाः त्रयः दातव्याः - प्रश्नद्वयं लेखनीयम्।<br>✷ अस्मिन् लेखः/करपत्रनिर्माणम्/अनुवादः/ सम्भाषणादयः दातव्याः ।<br>✷ इमे प्रश्नाः दशमीकक्ष्यायाः पाठ्यपुस्तकस्य व्यवहाररूपसम्बन्धाः भवेयुः । | 2/3 (2X6=12) | 12 |

| क्र.सं | सामर्थ्यम् | प्रश्नानां स्वभावः | विभिन्न प्रश्नप्रकाराः | अङ्काः |
|---|---|---|---|---|
| III | **भाषांशाः पदजलाभिवृद्धिः - व्याकरणांशाः** (30M) | १) समानार्थकपदानि (बहुलैच्छिकम्) | 3 x 1 = 3 | 3 |
| | | २) विरुद्धार्थकपदानि (बहुलैच्छिकम्) | 3 x 1 = 3 | 3 |
| | | ३) विभिक्तिपदानि | 3 x 1 = 3 | 3 |
| | | बहुलैच्छिकम् - २ | | |
| | | वाक्यरूपम् - १ | | |
| | | ४) क्रियापदानि (बहुलैच्छिकम्) | 2 x 1 = 2 | 2 |
| | | ५) सन्धयः | 4 x 1 = 4 | 4 |
| | | ✦ सन्धिपद अभिज्ञानम्-१ (बहुलैच्छिकम्) | | |
| | | ✦ सन्धिनामाभिज्ञानम्-१ (बहुलैच्छिकम्) | | |
| | | ✦ सन्धिंकृत्वा सन्धिनामलेखनम्-१ | | |
| | | ✦ विसन्धिंकृत्व सन्धिनामलेखनम्-१ | | |
| | | ६) समासाः | 4 x 1 = 4 | 4 |
| | | ✸ समस्तपदाभिज्ञानम् - १ (बहुलैच्छिकम्) | | |
| | | ✸ समासनामाभिज्ञानम् - १ (बहुलैच्छिकम्) | | |
| | | ✸ समस्तपदं + समासनामलेखनम् -१ | | |
| | | ✸ विग्रहवाक्यम् + समासनामलेखनम् -१ | | |
| | | ७) व्युत्पत्यर्थानि | 2 x 1 | 2 |
| | | ✸ बहुलैच्छिकम् - १ | | |
| | | ✸ वाक्यरूपम् - १ | | |
| | | ८) दत्तैः पदैः स्वीयवाक्यनिर्माणम् | 3 x 1 | 3 |
| | | ९) प्रत्ययानि | 2 x 1 | 2 |
| | | १०) कालपरिवर्तनम् (भूत-भविष्यत्-वर्तमान) | 2 x 1 | 2 |
| | | ११) कर्तरि / कर्मणि वाक्यप्रयोगम् | 2 x 1 | 2 |

# दशमीकक्ष्या

## प्राच्यपाठशालानाम् - गद्यभागः

**समयः - ३ घण्टाः** **अङ्काः - १००**

## PART - A 70 M

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ. अधः दत्तं गद्यांशं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।** 06M

(1) प्राचीनकाले ऋषिपरम्परातः भारतीयविचारधारा आरब्धा । तत्कारणेन भारतीयचिन्तनवैभवम् अत्यन्तं स्फुटं भवति । अन्तः अन्यदेशीयाः भारतीयचिन्तनं बहु प्रशंसितवन्तः । यतः भारतीयचिन्तनं सर्वदा प्रमाणयुक्तम् अनुभवसिद्धं च भवति । तदानीन्तनी ऋषिपरम्परा शास्त्राध्ययनस्य अधिकं प्राधान्यं प्रादात् । तदानीन्तनाः छात्राः शास्त्राध्ययनं कृत्वा तस्य मननं चिन्तनं च कुर्वन्ति स्म । भारतीयमहर्षीणां चिन्तनप्रक्रिया दर्शनशास्त्रमिति नाम्ना प्रथिता।

**प्रश्नाः**

१. भारतीयविचारधारा कस्मात् आरब्धा ?

२. के भारतीयचिन्तनं प्रशंसितवन्तः ?

३. भारतीयचिन्तनं कीदृशम् ?

४. दर्शनशास्त्रं नाम किम् ?

५. ऋषिपरम्परा कस्य प्राधान्यं प्रादात् ।

६. उपरितनगद्यांशस्य एकां शीर्षिकां सूचयतु ?

**आ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ?** 06M

(2) लालबहादुरः अतीव विनम्रः, सत्यवादी, कर्मठः, समाजसेवकश्च आसीत् । सः भारतमातुः पराधीनतां दृष्ट्वा व्यथितः आसीत् । अतः विद्याप्रियः अपि सः षोडशवर्षीयः विद्यालयीयं नियमितम् अध्ययनं परित्यज्य महात्मागान्धिनः आह्वानेन असहयोगान्दोलने भागम् अकामयत । तस्मिन् आन्दोलनक्रमे सः कारावासम् अपि प्राप्तवान् । ततः प्रभृति सः अन्यैः देशभक्तैः सह देशस्य स्वतन्त्रतायै निरन्तरम् आङ्गलशासकैः अयुध्यत । स्वतन्त्रतासमनन्तरं सः भारतीयरेलूमन्त्रिमण्डलस्य कार्यभारं गृहीतवान् । १९५७ तमे च वर्षे सः गृहमन्त्री अविद्यत। १९६४ तमे वर्षे भारतस्य प्रथमप्रधानमन्त्रिणः श्री जवाहरलालनेहूरोः मृत्योः समनन्तरं सः अस्माकं देशस्य प्रधानमन्त्री अभवत् ।

**प्रश्नाः**

१. लालबहादुरः कीदृशः ?

२. असहयोगान्दोलनं केन आरब्धम् ?

३. ‘व्यथितः’ इति शब्दस्य अर्थः कः ?

४. अस्माकं भारतदेशस्य द्वितीयप्रधानमन्त्री कः अभूत् ?

५. लालबहादुरः किमर्थं कारावासं प्राप्तवान् ?

६. लालबहादुरः कदा गृहमन्त्री अविद्यत ।

**इ. अधः दत्तम् अनुच्छेदं पठित्वा षट्विभिन्नप्रश्नान् लिखन्तु ।** 06M

(3) यस्मात् स्वेदात् किमपि उपयोगिवस्तु निर्मितं भवति । सर्वेषां कृते आवश्यकानि वस्तूनि निर्मितानि भवन्ति। धान्यं पुष्णाणि, फलानि, गृहाणि, द्वाराणि, वस्त्राणि, गृहोपकरणानि विविधानि वस्तूनि इत्यादीनि निर्मितानि भवन्ति सः च स्वेदः पवित्रः । परिश्रमजनितस्य उद्यमस्य स्वेदः । सः स्वेदः यस्य मस्तकतः शरीरतः च निर्गच्छति सः पवित्रः सः पूज्यः, सः युक्तः, सत्यं स एव मनुष्यः । किन्तु इदानीं तादृशाः जनाः विरलाः । भवन्तः यदा तरुणाः भविष्यन्ति तदा तेषां श्रामिकाणां निमित्तं कार्यं कृत्वा तेषां जीवनं सुखमयं कुर्वन्तु ।

**प्रश्नाः -**

१.

२.

३.

४.

५.

६.

**ई. अधः दत्तमुच्छेदं पठित्वा आन्ध्रभाषया अनुवदन्तु ।** 06M

(4) पूर्वम् अस्माकं देशे पतञ्जलिनाम कश्चन वैय्याकरणः आसीत् । सः विश्वविश्रुतः भाषाविज्ञानी आसीत् । तेन माहाभाष्यनामकः कश्चन अपूर्वः व्याकरणग्रन्थः, योगसूत्राणि इति कश्चन योगग्रन्थः च लिखितः । अपि च तेन कश्चन आयुर्वेदग्रन्थोऽपि लिखितः इति विख्यातिरस्ति । पतञ्जलेः नामकरणविषये ‘सः शेषनागस्य अवतारः आसीत्’ इति काचित् जनश्रुतिः वर्तते ।

(5) **अधः दत्तानि वाक्यानि संघटनाक्रमेण पुनः लिखन्तु ।** 06M

१. आश्रमवासिनः सर्वे मतङ्गमहर्षिम् अनुसरन्तः गतवन्तः ।

२. तेषां शरीरतः स्वेदबिन्दवः भूमौ अपतन् ।

३. छात्रोत्तरैः असन्तुष्टः शिक्षकः समाधानाय कथामेकां श्रावितवान् ।

४. शबरी रामाय सुगन्ध, सुन्दरपुष्पाणां वृत्तान्तं अकथयत् ।

५. शिक्षकः छात्रान् ''अस्मिन् जगति किं जलम् उत्तमम्'' इति पृष्टवान् ।

६. मतङ्गमहर्षिः स्वशिष्येभ्यः श्रमायाः वैशिष्ट्यं विशदयति ।

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

**अ. अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।** 4 x 3 = 12

(6) शकुन्तला दूरदेशं गच्छतीति कारणेन कण्वः बाधां प्राप्तवान् किल ! यदि भवतः आप्तः दूरदेशं गच्छति भवान् कथं प्रतिस्पन्दते इति लिखतु ।

(7) चन्द्रापीडः अनेकाः विद्याः अधीतवान्, भवान् कति विद्याः अध्येतुं सिद्धः अस्ति ? ते के ?

(8) नालन्दाविश्वविद्यालये महाग्रन्थालयः आसीत् किल ! भवतः गृहस्य समीपे स्थितस्य ग्रन्थालयस्य वैशिष्ट्यं लिखतु ।

(9) 'गद्यकवीनां बाणः महान्' - कथमिति लिखन्तु ।

**आ. अधः दत्तानां प्रश्नानां समाधानानि निबन्धरूपेण लिखन्तु ।** 2 x 8 = 16

(10) एलिसरः हिब्रूभाषाभिमानी - कथमिति लिखन्तु ।

**अथवा**

'निर्धनत्वं न गौरवाय' इत्यंशं उद्दिश्य लिखन्तु ।

(11) प्राचीनविश्वविद्यालयेषु नालन्दस्य महत्त्वपूर्णं स्थानम् आसीत् - कथमिति विशदयन्तु ।

अथवा

विद्याधिकोऽपि सङ्कुचितस्वभावेन दुःखं प्राप्नोतीति वेङ्कटरावस्य पात्राधारेण विवृणोन्तु ।

**इ. अधः दत्तेषु प्रश्नेषु द्वयोः समाधाने निबन्धरूपेण लिखन्तु ।** 2 x 6 = 10

(12) संस्कृतभाषायाः वैशिष्ट्यं विवृण्वन् करपत्रमेकं लिखन्तु ।

(13) वेङ्कटरावग्रमीणयोः संवादं सम्भाषणरूपेण लिखन्तु ।

(14) **अधः दत्तम् अनुच्छेदं संस्कृतेन अनुवदन्तु ।**

వాల్మీకి మహర్షి సంస్కృతంలో రాముని చరితమును రామాయణముగా రచించెను. అందు 24,000 శ్లోకాలు, 6 కాండలు కలవు. భారతీయధార్మిక-సామాజిక-రాజకీయ-సాంస్కృతిక-కౌటుంబికాది విలువలకు కేంద్రస్థానమైన ఈ రామాయణము ఆదికావ్యము. ఇది ఎంతో కాలం క్రితం వ్రాయబడినప్పటికీ ఇప్పటికీ అనేక మందికి నిత్యపారాయణగ్రంథముగా ఉండటమనేది దీని వైశిష్ట్యమును తెలుపుతున్నది.

# PART - B

**30 M**

## III. भाषांशाः

**अ) रेखाङ्कितपदस्य समुचितसमानार्थकपदं दत्तेभ्यः विकल्पेभ्यः चित्वा लिखन्तु ।**

१) <u>जननी</u> जन्मभूमिश्च स्वर्गादपि गरीयसी । ( )

a) देवी b) जाया c) जनयित्री d) भाषा

२) <u>तरवः</u> प्राणवायुं यच्छन्ति । ( )

a) विटपः b) पलाशं c) पादपः d) काननम्

३) <u>समन्ततः</u> वायुः वाति ( )

a) अन्यत्र b) एकत्र c) कुत्र d) सर्वत्र

**आ) रेखाङ्कितपदस्य समुचितविरुद्धार्थकपदं दत्तेभ्यः विकल्पेभ्यः चित्वा लिखन्तु ।**

४) निम्बपत्रं <u>तिक्तम्</u> भवति । ( )

a) कटुम् b) आल्मम् c) कषायम् d) मधुरम्

५) राजा पण्डितानां <u>सम्मानं</u> करोति । ( )

a) अपमानम् b) प्रशंसनम् c) पूजनम् d) सन्देहम्

६) कवाटम् <u>उद्घाटयतु</u> राम ! ( )

a) अस्तु b) पिदधातु c) क्षिपतु d) त्यजतु

७) <u>लोभेन</u> बुद्धिः चलति । ( )

a) प्रथमाविभक्तिः b) द्वितीयाविभक्तिः c) सप्तमीविभक्तिः d) तृतीयाविभक्तिः

८) परन्तु <u>मित्र!</u> तेन स्वपुत्रं बलिपशुं करोति भवान् । ( )

a) प्रथमाविभक्तिः b) सम्बोधनप्रथमाविभक्तिः c) द्वितीयाविभक्तिः d) षष्ठीविभक्तिः

**इ) समुचितं क्रियापदं चित्वा लिखन्तु ।**

९) अहं मम मित्रम् '......................' ( )

a) मेलिष्यन्ति b) मेलिष्यसि c) मेलिष्यामः d) मेलिण्यामि

१०) पूर्णचन्द्रस्य दर्शनेन मनसि आह्लादः .................... ( )

a) जाये b) जायेथे c) जायेसे d) जायते

**ई) निर्देशानुसारं लिखन्तु ।**

११) यणादेशसन्धेः पदं चिन्वन्तु । ( )

a) कोऽपि b) परमेश्वरः c) तदेव d) इत्यालोच्य

१२) ‘अङ्कितः’ - अस्य पदस्य सन्धिं चिन्वन्तु ।

a) सवर्णदीर्घ b) विसर्ग c) अनुस्वार d) गुण

१३) ‘नञ् तत्पुरुष’ समासस्य सम्बद्धपदं चिन्वन्तु ।

a) अधर्मः b) तृषार्तः c) अर्थनाशम् d) राजपुरुषः

१४) ‘सक्रोधम्’ अस्य पदस्य समासनाम चिन्वन्तु ।

a) अव्ययीभावः b) तत्पुरूषः c) बहुव्रीहिः d) कर्मधारयः

१५) मनांसि मथ्नाति इति । (अस्य व्युत्पत्यर्थं चिन्वन्तु)

a) मन्मथः b) माता c) मातुलः d) मा

१६) ते + अत्र - ................. (सन्धिं कृत्वा सन्धिनाम लिखन्तु)

१७) ततश्च ....................... + ....................... (सन्धिविच्छेदं कृत्वा सन्धिनाम लिखन्तु)

१८) रूपेनसम्पन्नः (समस्तपदं समासनाम च लिखन्तु ।)

१९) ‘मन्दबुद्धिः’ विग्रहवाक्यं समासनाम च लिखन्तु ।

**उ) अधः दतानि पदानि उपयुज्य नूतनवाक्यानि लिखन्तु ।**

२०) त्यागः -

२१) धर्मः -

२२) वार्तालापः -

**ऊ) धातु-प्रत्ययौ योजयित्वा लिखन्तु ।**

२३) हरिचन्दनः चित्रं ................... (दृश् + क्त्वा) गृहं गच्छति ।

२४) रामः जालं .......................... (पा + तुमुन्) पाकशालाम् गच्छति ।

**ऋ) निर्देशानुसारं लिखन्तु ।**

२५) महती जुगुप्सा अजायत । (वर्तमानकाले परिवर्तयन्तु)

२६) अहं चाकलेहं खादितुम् इच्छामि । (भविष्यत्काले परिवर्तयन्तु)

२७) छात्राः गृहम् गच्छन्ति । (कर्मणि वाक्ये परिवर्तयन्तु)

२८) तेन पिपासया शीतलजलम् पीयते । (कर्तरिवाक्ये परिवर्तयन्तु ।)

२९) वरः .................. (वधू) नूतनवस्त्राणि समर्पितवान् (‘वधू’ शब्दस्य चतुर्थी-एकवचनम्)

३०) धर्मः ........................ व्युत्पत्तिं लिखन्तु ।

# Oriental Course

# Unit Test - Model

**(Type of questions)** 25 M

## पद्यभागः

| | | | |
|---|---|---|---|
| **I.** | **भावावगमनम् - प्रतिस्पन्दनम्** | | |
| १. | परिचितश्लोकम्<br>प्रतिपदार्थलेखनम् (अथवा) श्लोकपूरणम् भावलेखनम् | - | 5m |
| २. | अपरिचित श्लोकम् - प्रश्नाः | - | 5m |
| **II.** | **भावव्यक्तीकरणम् - सर्जनात्मकता** | | |
| ३. | स्वीयरचना | - | (½) - 1 x 4 = 4 |
| ४. | सर्जनात्मकता | - | (½) - 1 x 4 = 4 |
| **III.** | **भाषांशाः** | | |
| ५. | पदजालाभिवृद्धिः | - | 3m - (6 x ½) |
| ६. | व्याकरणांशाः | - | 4m - (8 x ½) |

## गद्यभागः

25 M

| | | | |
|---|---|---|---|
| **I.** | **भावावगमनम् - प्रतिस्पन्दनम्** | | |
| १. | परिचितगद्यम् - प्रश्नाः / संघटनाक्रमेण लेखनम् | - | 5m |
| २. | अपरिचित गद्यम् - प्रश्नाः | - | 5m |
| **II.** | **भावव्यक्तीकरणम् - सर्जनात्मकता** | | |
| ३. | स्वीयरचना | - | (½) - 1 x 4 = 4 |
| ४. | सर्जनात्मकता | - | (½) - 1 x 4 = 4 |
| **III.** | **भाषांशाः** | | |
| ५. | पदजालाभिवृद्धिः | - | 3m - (6 x ½) |
| ६. | व्याकरणांशाः | - | 4m - (8 x ½) |

## अ. सामर्थ्यानुसारेण लिखितपरीक्षा भारत्वम्

**समयः - १घण्टाः** **अङ्काः - २०**

| क्र.सं | सामर्थ्यानि | भारत्वम् - लिखितपरीक्षा | अङ्काः |
|---|---|---|---|
| I | **भावावगमनम् - प्रतिस्पन्दनम्**<br>✦ अपरिचितगद्यम्<br>✦ श्लोकपूरणम् भावलेखनम् | 35% | (7)<br>3<br>4 |
| II | **भावव्यक्तीकरणम् - सर्जनात्मकता**<br>✦ स्वीयरचना-लघुप्रश्नाः ।<br>✦ सर्जनात्मकता । | 20%+20%=40% | (8)<br>4<br>4 |
| III | **भाषांशाः**<br>✦ **पदजालाभिवृद्धिः ।**<br>- समानार्थकम्<br>- विरुद्धार्थकम्<br>✦ **व्याकरणांशाः**<br>- सङ्घटनम् - सङ्घटनम्+विघटनम्<br>- समासः - समस्तपदम्+विग्रहवाक्यम्<br>- शब्दः - शब्देषु वचनपरिवर्तनम्<br>- धातुः - धातुषु वचनपरिवर्तनम् | 10%+15%=25%<br>10%<br><br><br><br>15% | (5)<br>2<br><br><br><br>3 |
| | | 100% | 20 |

## आ. सामर्थ्याधारेण प्रश्नप्रकाराः, प्रश्नसंख्या, अङ्काः, स्वभावाश्च

| क्र.सं | सामर्थ्यम् | प्रश्नानां स्वभावः | प्रश्नप्रकाराः | अङ्काः |
|---|---|---|---|---|
| I | **भावावगमनम् - प्रतिस्पन्दनम्** (35%) 7M | **१) अपरिचितगद्यम्**<br>✦ अस्मिन् अपरिचितगद्यं दत्त्वा प्रश्नानां समाधान-लेखनम् ।<br>✦ त्रयः प्रश्नाः । सर्वे समाधेयाः । | 1 (3x1=3) | 3 |
| | | **२) परिचित श्लोकम्**<br>(नक्षत्रचिह्नितश्लोकान्येव दातव्यानि)<br>✦ श्लोकपूरणम् - भावलेखनम् ।<br>✦ द्वौ श्लोकौ दीयते। तयोः एकः श्लोकः भावसहितं लेखनीयः। | 1/2 (1x4=4) | 4 |
| II | **भावव्यक्तीकरणम् सर्जनात्मकता** (40%) 8M | २) स्वीयरचनायां निबन्धनात्मकप्रश्नाः प्रश्नद्वये एकः समाधेयः । | 1/2 (1x4=4) | 4 |
| | | **३) सर्जनात्मकता**<br>✦ द्वौ प्रश्नौ दीयेते ।<br>✦ एकस्य प्रश्नस्य समाधानं ८-१० वक्येषु लेखनीयः।<br>✦ विभिन्नपाठेभ्यः प्रश्नाः समाधेयाः। अनुवादः/सम्भाषणं/निबन्धः/लेखः इत्यादिप्रक्रियासु प्रश्नाः भवन्ति । | 1/2 (1x4=4) | 4 |
| III | **भाषांशाः** (25%) 6M | **४) पदजालाभिवृद्धिः**<br>**अ. समानार्थकपदानि ।**<br>✦ प्रश्नद्वयं दीयते, द्वयमपि समाधेयम् । | 2/2 (2x½=1) | 1 |
| | | **आ. विरुद्धार्थकपदानि ।**<br>✦ प्रश्नद्वयं दीयते, द्वयमपि समाधेयम् । | 2/2 (2x½=1) | 1 |
| | | **५) व्याकरणांशाः**<br>**अ. सन्धिः**<br>✦ सन्धिसंघटनम् | 1/1 | ½ |
| | | ✦ सन्धिविघटनम्, **(प्रश्नाः वाक्यरूपेण दीयन्ते।)** | 1/1 | ½ |
| | | **आ. समासः**<br>✦ समस्तपदलेखनम् | 1/1 | ½ |
| | | ✦ विग्रहवाक्यलेखनम **(प्रश्नाः वाक्यरूपेण दीयन्ते।)** | 1/1 | ½ |
| | | **इ. शब्दाः** | 1/1 | ½ |
| | | **ई. धातवः, (प्रश्नाः वाक्यरूपेण दीयन्ते।)** | 1/1 | ½ |

## इ. आदर्शप्रश्नपत्रम्

### I. भावावगमनम् - प्रतिस्पन्दनम्

1. अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु । 3m

अध्योध्या कोशलदेशस्य राजधानी । तस्य राजा दशरथः । दशरथस्य कौशल्या, सुमित्रा, कौकेयी इति तिस्रः भार्याः आसन् । कौसल्यायाः पुत्रः श्रीरामः । पितुः आज्ञया सः सीतया लक्ष्मणेन सह वनं गतवान् । सीता कञ्चन हरिणं द्रष्टवती ।

१. अयोध्या कस्य राजधनी ?

२. दशरथस्य भार्याः काः ?

३. कस्य आज्ञया रामः वनं गतवान् ?

2. श्लोकं पूरयित्वा भावं लिखन्तु । 4m

तदन्यतस्तावदनन्यकार्यौ .................. चातकोऽपि ।

अथवा

सर्वेन्द्रियाणि ........................... साथयेत् ।

### II. भावव्यक्तीकरणम् - सर्जनात्मकता

3. **अधः दत्तयोः प्रश्नयोः एकस्य समाधानं लिखन्तु ।** 1 x 4 = 4

अ. कौत्सस्य गुरुभक्तिं स्वीयवाक्यैः लिखन्तु ।

अथवा

केभ्यः जन्तुभ्यः के गुणाः ज्ञातुं शक्यन्ते इति पाठाधारेण लिखन्तु ।

4. **अधः दत्तप्रश्नयोः एकस्य समाधानं लिखन्तु ।** 1 x 4 = 4

अ. लोकहितार्थं भवन्तः किं करिष्यन्ति इति मित्राय पत्रं लिखन्तु ।

अथवा

विवेकानन्दस्य आशयान् सम्भाषणरूपेण लिखन्तु ।

### III. भाषांशाः

5. **पदजालाभिवृद्धिः - निर्देशानुसारं रेखाङ्कितपदानां समाधानानि लिखन्तु ।** 4 x ½ = 2

अ. इन्द्रः याचकः भूत्वा कर्णं कवचकुण्डलानि याचितवान् । (समानार्थकः)

आ. हिन्दूमहासागरः अत्यन्तगम्भीरः भवति । (समानार्थकः)

इ. रात्रौ अन्धकारः प्रभवति । दिवा ............. प्रभवति । (विरुद्धार्थकः)

ई. समुद्रे जलं पतति चेत् ............ भवति । (सफलम् - व्यतिरेकार्थपदम्)

6. **व्याकरणांशाः - निर्देशानुसारं रेखाङ्कितपदानां समाधानानि लिखन्तु ।** $6 \times \frac{1}{2} = 3$

अ. वशिष्ठः श्रीरामस्य कृते गुरूपदेशम् कृतवान् । (सन्धिं विघटयन्तु)

आ. ललितां दृष्ट्वा सतीशः+हसति हसति । (सन्धत्त)

इ. अनर्थानां मूलकारणं अज्ञानम् एव । (विग्रहवाक्यं लिखन्तु ।)

ई. .................. करणीयम् । (लोकाय हितम् - समस्तपदं लिखन्तु ।)

उ. अहं .............. पठामि । ('पाठ' - शब्दस्य द्वितीयाविभक्तिरूपम् ।)

ऊ. बालकः गृहं ............. । ( )

क) गच्छतः ख) गच्छति ग) गच्छामि